Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ वारुणऋग्विधानमुच्यते —

वसिष्ठ ऋषिः। त्रिष्टुप् छन्दः। वरुणो देवता। ध्रुवासु त्वासु क्षितिषु हृत्। क्षियन्तो व्या अस्मत्पाशं शिरः। वरुणो मुमोचत् शिखा। अवो वन्वाना अदितेः कवचम्। उपस्थाद्यूयं पात नेत्रम्। स्वस्तिभिस्सदा नः अस्त्रम्। ध्यानम् —

अच्छांशुकाभरणमाल्यविलेपनाढ्यः
पाशांकुशाभयवरोद्यतदोस्सरोजः ।
शुभ्रारविन्दवसतिस्सुसितः प्रसन्नो
भूयाद्विभूतिविधये वरुणश्चिरं वः ॥

ध्रुवासु त्वासु क्षितिषु क्षियन्तो *व्या३स्मत्पाशं वरुणो मुमोचत् । अवोवन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिस्सदा नः इति मन्त्रः । ऋणमोचनप्रधानोयं मन्त्रः ॥

अस्याक्षरन्यासः—

अंगुल्यग्रससन्धिपायुशिवसंज्ञाधारनाभिष्वधः
कुक्षौ पृष्ठहृदोरुरोजगळदोस्सन्ध्यग्रवक्त्रेषु च ।
गण्डघ्राणविलोचनश्रवणयुक्भ्रूमध्यमस्तेषु के
सर्वाङ्गेषु तथा न्यसेद्विशदधीर्वर्णैर्मनूत्थैः क्रमात् ॥

ध्रुवासुत्वान्यासे त्रिचत्वारिंशदक्षराणि । व्या३स्मदित्यत्र त्रिं नमः अं नमः स्मं नमः इति ॥

अथ पूजाविधिः—

केवलपद्मे विद्यायै० सुधायै० कुमुदिन्यै० पूर्णवारुण्यै० विश्वतोमुख्यै० तरङ्गिण्यै० सुरसायै० सुशीलायै० व्यापिन्यै० ९ इति नवशक्तयः विवरणे प्रोक्ताः । अस्मिन्पीठे वरुणं समावाह्य समर्चयेत् । अङ्गैः प्रथमावृतिः । अनन्ताय० वासुकये० तक्षकाय० कार्कोटकाय० पद्माय० महापद्माय० शङ्खाय० गुळिकाय० ८ इति द्वितीयावृतिः । इन्द्रादिभिस्तृतीया । एवं शुद्धजलेन दीक्षाकलशं संपूर्य तस्मिन्नावाह्य वरुणं संपूज्य समभिषिच्य लक्षं जपेत् पुरश्चरणार्थम् । आज्यसिक्तेन क्षीरपायसेन दशांशं जुहुयात् । पुरश्चरणाहोमः । एवं कृते ऋणमोचनं भवति ॥

---

* व्याअस्मत्पाशं इति ङ पाठः ।

अथ प्रयोगः —

इक्षोस्सितस्य शकलैर्घृतसंसिक्तैश्चतुर्दिनं जुहुयात् ।
सकलोपद्रवशान्त्यै तथर्णमुक्त्यै च संपदे सुचिरम् ॥

तत्र इक्षोः, सितस्य शकलैरिति शर्कराशकलैः । खण्डशर्कराभिरित्यर्थः । एतदुक्तं भवति — खण्डैः घृतसिक्तैः संख्यानुक्ते सहस्रमिति न्यायात् सहस्रं चतुर्दिनं जुहुयात् । तस्मादुक्तफलं भवति ॥

प्रयोगान्तरम् —

वेतससमिद्युतहुतात् वृष्टिं काले वितनुते वरुणः ।

वेतसं-நீர்வஞ்சி. प्रयोगान्तरम् —

गव्यक्षीरसमेतं त्रिदिनकृतं दिनमुखेषु मुदितमनाः ।
शतभिषजि समुदितेऽर्के चतुश्शतं पायसं(प्र)हुनेत् ॥

सघृतं ऋणमोचनाय लक्ष्म्यै जनसंवननाय शुक्रवारे वा ।

अयमर्थः — सूर्ये शतभिषङ्नक्षत्रे समुदिते वा शुक्रवारे वा गव्यक्षीरेण पायसं संपाद्य तेन पायसेन घृतसिक्तेन त्रिदिनं प्रातश्चतुश्शतसंख्यं हुनेत् । तस्मादृणमोचनं च जनवश्यं च लक्ष्मीश्च भवति ॥

प्रयोगान्तरम् —

पाशाबद्धं वैरिणमंकुशसंप्रोतमम्बुधेः पारे ।
*ध्यायेत्परे क्षिपन्तं वरुणं जुहुयाच्च वा तथा प्रजपेत् ॥

पाशनिबद्धं वैरिणमसिनाच्छिद्याशु नाशयन्तममुम् ।
ध्यायन्वेतससमिधो गोमूत्रयुता हुनेत्तदपहत्यै ॥

अयमर्थः — समुद्रस्य परे पारे क्षिपन्तं पाशेन बद्धं चांकुशेन प्रोतं

* ध्यायन् इति ख, ग, घ मातृकापाठः ।

यं शत्रुं ध्यायेत् । एवं ध्यात्वा, समिधोऽनुक्तविषये पलाश इति न्यायात् सहस्रं पलाशसमिधो जुहुयात् । केवलं जपेद्वा । उच्चाटनं भवति । तमेव शत्रुं पाशेन बद्ध्वाऽसिना छित्वा नाशयन्तं वरुणं च ध्यायेत् । एवं ध्यात्वा गोमूत्रसिक्ताभिः वेतससमिद्भिर्हुनेत् । अथवा एवमेव ध्यात्वा जपेन्मन्त्रम् । तस्मात्तस्य शत्रोर्मरणं भवति ॥

वेतसं– நீர்வஞ்சி प्रयोगान्तरम् —

दौग्धान्नैर्भृगुवारे घृतसंसिक्तैः कृतश्च हवनविधिः ।
ऋणमोक्षदश्च विविधोपद्रवशमकृद्रमाकरः प्रोक्तः ॥

प्रयोगान्तरम् —

पश्चिमसन्ध्यासमये पश्चिमवदनोऽनलं समाराध्य ।
ऋचमेनामभिजप्याच्चतुश्शतं सकलदुःखशमनाय ॥

अयमर्थः — सन्ध्याकाले अग्निं पुरतस्संस्थाप्य तस्मिन्वरुणं समावाह्य समर्च्य पश्चिमाभिमुखो भूत्वा जपेच्चतुश्शतसंख्यम् । तस्मादुक्तफलं भवति ॥

प्रयोगान्तरम् —

शालीर्घृतसंसिक्तास्सरिदन्तरितो जुहोतु परसेनाम् ।
संस्तम्भयितुं त्रिदिनं सुमना मन्त्री चतुश्शतावृत्त्या ॥

शाली—धान्यविशेषः குளச்செந்நெல்.

अयमर्थः — होमस्थानसेनानिवेशयोर्मध्ये सरिद्यथा भवेत्तथा स्थित्वा घृतसिक्ताभिश्शालीभिः चतुश्शतसंख्यं नित्यशः त्रिदिनं हुनेत् । तस्मात्पर-सेनास्तम्भनं भवति ॥

प्रयोगान्तरम् —

प्रत्यङ्मुखोऽथ मन्त्री प्रतर्पयेद्वा जलैस्सुशुद्धतरैः ।
यस्सोऽप्युपद्रवाणां रुन्ध्यां निचयं श्रियं समृच्छति च ॥

अयमर्थः— उपद्रवनिरोधनार्थे पश्चिममुखो जलैस्तर्पयेत् वरुणम् । तस्मादुपद्रवनिवृत्तिश्च श्रीश्च भवेत् ॥

अथ वारुणमन्त्रप्रसङ्गात् वारुणयन्त्रमपि अस्यैव मन्त्रस्य यन्त्रसारोक्तं लिख्यते—

षट्कोणकर्णिकामध्ये तारं कोणेषु षट्स्वपि ।
षड्वर्णमष्टपत्रे च केसरोद्यत्स्वरे लिखेत् ॥

पञ्चषड्वेदषट्पञ्चषट्चतुष्पञ्चमनोः क्रमात् ।
ध्रुवासुत्वाद्यक्षराणि बहिः परऋणेत्यृचा ॥

हलिभश्चावेष्ट्य भूगेहकोणे वंबीजमालिखेत् ।
ऋणमोचनमेतत्तु यन्त्रं सर्वसमृद्धिदम् ॥

सर्वरक्षाकरं वश्यं शत्रुचोरविनाशनम् ।
किमत्र बहुनोक्तेन वाञ्छितार्थप्रदं नृणाम् ॥

अस्यार्थः— प्रथमं षट्कोणं विलिख्य तन्मध्ये प्रणवं विलिख्य तन्मध्ये साध्यनामादियन्त्रन्यायान्विलिखेत् । पुनः षट्कोणेषु वरुणाय नमः इति षडर्णान्विलिखेत् । पुनस्तद्बहिरष्टपत्रं पद्मं विलिख्य तत्केसरेषु स्वरान् द्वौ द्वौ विलिखेत् । पुनस्तद्दळमध्ये ध्रुवासुत्वासु इति पूर्वदळे, क्षितिषु क्षियन्त इत्याग्नेयें, व्यास्मत्पाशं इति दक्षिणे, वरुणो मुमोचत् इति नैर्ऋत्यां, अवो वन्वाना इति पश्चिमे, अदितेरुपस्थात् इति वायव्ये, यूयं पात इति सौम्ये, स्वस्तिभिस्सदा नः इति ऐशान्ये विलिखेत् ॥ पुनस्तद्बहिः वृत्तद्वयं विलिख्य, पूर्ववृत्ते "परऋणासावीरधमत्कृतानि माहं राजन्नन्यकृतेन भुजम् । अव्युष्टा इन्नु भूयसीरुषास आनो वीरान्वरुण तासु शाधि" ॥ इत्यनया ऋचा वेष्टयेत् । द्वितीयवृत्ते कादिवर्णैर्वेष्टयेत् । पुनस्तद्बहिश्चतुरश्रं विलिख्य तत्कोणेषु वं वं इति विलिखेत् । एवं विलिख्य धृते द्राव्याद्दणान्मुक्तो भवति ॥

इति प्रपञ्चसारसारसंग्रहे गीर्वाणेन्द्रविरचिते
त्रिंशः पटलः ॥